# VISNU SAHASRANAMA STOTRAM
# & APADUDDHARAKA STOTRAM

**Editor : Medhā Michika, AVG, Anaikatti**




Published by:

Arsha Avinash Foundation
104 Third Street, Tatabad, Coimbatore 641012, India
Phone: + 91 9487373635
E mail: arshaavinash@gmail.com
www.arshaavinash.in

श्रीः

# विष्णुसहस्रनामस्तोत्रम्
# viṣṇusahasranāmastotram
and
# आपदुद्धारकस्तोत्रम्
# āpaduddhārakastotram



# विष्णुसहस्रनामस्तोत्रम्
# viṣṇusahasranāmastotram

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।

śuklāṃbaradharaṃ viṣṇuṃ śaśivarṇaṃ caturbhujam |

प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥ १॥

prasannavadanaṃ dhyāyet sarvavighnopaśāntaye |1|

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्।

vyāsaṃ vasiṣṭhanaptāraṃ śakteḥ pautramakalmaṣam |

पराशरात्मजं वन्दे शुकतातं तपोनिधिम्॥ २॥

parāśarātmajaṃ vande śukatātaṃ taponidhim |2|

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे।

vyāsāya viṣṇurūpāya vyāsarūpāya viṣṇave |

नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः॥ ३॥

namo vai brahmanidhaye vāsiṣṭhāya namo namaḥ |3|

अविकाराय शुद्धाय नित्याय परमात्मने।

avikārāya śuddhāya nityāya paramātmane |

सदैकरूपरूपाय विष्णवे सर्वजिष्णवे॥ ४॥

sadaikarūparūpāya viṣṇave sarvajiṣṇave |4|

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात्।

yasya smaraṇamātreṇa janmasaṃsārabandhanāt |

विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे॥ ५॥

vimucyate namastasmai viṣṇave prabhaviṣṇave |5|

ॐ नमो विष्णवे प्रभविष्णवे।

om namo viṣṇave prabhaviṣṇave |

श्रीवैशम्पायन उवाच ---

śrīvaiśampāyana uvāca ---

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः।

śrutvā dharmānaśeṣeṇa pāvanāni ca sarvaśaḥ |

युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत॥ ६॥

yudhiṣṭhiraḥ śāntanavaṃ punarevābhyabhāṣata |6|

युधिष्ठिर उवाच ---

yudhiṣṭhira uvāca ---

किमेकं दैवतं लोके किं वाप्येकं परायणम्।

kimekaṃ daivataṃ loke kiṃ vāpyekaṃ parāyaṇam |

स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम्॥ ७॥

stuvantaḥ kaṃ kamarcantaḥ prāpnuyurmānavāḥ śubham |7|

को धर्मः सर्वधर्माणां भवतः परमो मतः।

ko dharmaḥ sarvadharmāṇāṃ bhavataḥ paramo mataḥ |

किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात्॥ ८॥

kiṃ japanmucyate janturjanmasaṃsārabandhanāt |8|

श्रीभीष्म उवाच ---

śrībhīṣma uvāca ---

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम्।

jagatprabhuṃ devadevamanantaṃ puruṣottamam |

स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः॥ ९॥

stuvannāmasahasreṇa puruṣaḥ satatotthitaḥ |9|

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्।

tameva cārcayannityaṃ  bhaktyā puruṣamavyayam |

ध्यायन् स्तुवन्नमस्यंश्च यजमानस्तमेव च॥ १०॥

dhyāyan stuvannamasyaṃśca yajamānastameva ca |10|

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्।

anādinidhanaṃ viṣṇuṃ sarvalokamaheśvaram |

लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्॥ ११॥

lokādhyakṣaṃ stuvannityaṃ sarvaduḥkhātigo bhavet |11|

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्।

brahmaṇyaṃ sarvadharmajñaṃ lokānāṃ kīrtivardhanam |

लोकनाथं महद्भूतं सर्वभूतभवोद्भवम्॥ १२॥

lokanāthaṃ mahadbhūtaṃ sarvabhūtabhavodbhavam |12|

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः।

eṣa me sarvadharmāṇāṃ dharmo'dhikatamo mataḥ |

यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा॥ १३॥

yadbhaktyā puṇḍarīkākṣaṃ stavairarcennaraḥ sadā |13|

परमं यो महत्तेजः परमं यो महत्तपः।

paramaṃ yo mahattejaḥ paramaṃ yo mahattapaḥ |

परमं यो महद्ब्रह्म परमं यः परायणम्॥ १४॥

paramaṃ yo mahadbrahma paramaṃ yaḥ parāyaṇam |14|

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्।

pavitrāṇāṃ pavitraṃ yo maṅgalānāṃ ca maṅgalam |

दैवतं देवतानां च भूतानां योऽव्ययः पिता॥ १५॥

daivataṃ devatānāṃ ca bhūtānāṃ yo'vyayaḥ pitā |15|

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे।

yataḥ sarvāṇi bhūtāni bhavantyādiyugāgame |

यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये॥ १६॥

yasmiṃśca pralayaṃ yānti punareva yugakṣaye |16|

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते।

tasya lokapradhānasya jagannāthasya bhūpate |

विष्णोर्नामसहस्रं मे शृणु पापभयापहम्॥ १७॥

viṣṇornāmasahasraṃ me śṛṇu pāpabhayāpaham |17|

यानि नामानि गौणानि विख्यातानि महात्मनः।

yāni nāmāni gauṇāni vikhyātāni mahātmanaḥ |

ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये॥ १८॥

ṛṣibhiḥ parigītāni tāni vakṣyāmi bhūtaye |18|

ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः॥

ṛṣirnāmnāṃ sahasrasya vedavyāso mahāmuniḥ |

छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः॥ १९॥

chando'nuṣṭup tathā devo bhagavān devakīsutaḥ |19|

अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः।

amṛtāṃśūdbhavo bījaṃ śaktirdevakinandanaḥ |

त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते॥ २०॥

trisāmā hṛdayaṃ tasya śāntyarthe viniyujyate |20|

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्॥

viṣṇuṃ jiṣṇuṃ mahāviṣṇuṃ prabhaviṣṇuṃ maheśvaram |

अनेकरूप दैत्यान्तं नमामि पुरुषोत्तमम्॥ २१॥

anekarūpa daityāntaṃ namāmi puruṣottamaṃm |21 |

## ॥ पूर्वन्यासः ॥

## || pūrvanyāsaḥ ||

अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य ॥

asya śrīviṣṇordivyasahasranāmastotramahāmantrasya |

श्रीवेदव्यासो भगवान् ऋषिः ।

śrīvedavyāso bhagavān ṛṣiḥ |

अनुष्टुप् छन्दः ।

anuṣṭup chandaḥ |

श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता ।

śrīmahāviṣṇuḥ paramātmā śrīmannārāyaṇo devatā |

अमृतांशूद्भवो भानुरिति बीजम् ।

amṛtāṃśūdbhavo bhānuriti bījam |

देवकीनन्दनः स्रष्टेति शक्तिः ।

devakīnandanaḥ sraṣṭeti śaktiḥ |

उद्भवः क्षोभणो देव इति परमो मन्त्रः ।

udbhavaḥ kṣobhaṇo deva iti paramo mantraḥ |

शङ्खभृन्नन्दकी चक्रीति कीलकम् ।

śaṅkhabhṛnnandakī cakrīti kīlakam |

शार्ङ्गधन्वा गदाधर इत्यस्त्रम्।

śārṅgadhanvā gadādhara ityastram |

रथाङ्गपाणिरक्षोभ्य इति नेत्रम्।

rathāṅgapāṇirakṣobhya iti netram |

त्रिसामा सामगः सामेति कवचम्।

trisāmā sāmagaḥ sāmeti kavacam |

आनन्दं परब्रह्मेति योनिः।

ānandaṃ parabrahmeti yoniḥ |

ऋतुः सुदर्शनः काल इति दिग्बन्धः॥

ṛtuḥ sudarśanaḥ kāla iti digbandhaḥ |

श्रीविश्वरूप इति ध्यानम्।

śrīviśvarūpa iti dhyānam |

श्रीमहाविष्णुप्रीत्यर्थे सहस्रनामजपे विनियोगः॥

śrīmahāviṣṇuprītyarthe sahasranāmajape viniyogaḥ |

## ॥ ध्यानम् ॥

||dhyānam ||

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानां

kṣīrodanvatpradeśe śucimaṇivilasatsaikate mauktikānāṃ

मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः।

mālākḷptāsanasthaḥ sphaṭikamaṇinibhairmauktikair-
maṇḍitāṅgaḥ |

शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षैः

śubhrairabhrairadabhrairupariviracitairmuktapīyūṣavarṣaiḥ

आनन्दी नः पुनीयादरिनलिनगदाशङ्खपाणिर्मुकुन्दः॥ १॥

ānandī naḥ punīyādarinalinagadāśaṅkhapāṇirmukundaḥ |1|

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे

bhūḥ pādau yasya nābhirviyadasuranilaścandrasūryau ca netre

कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः।

karṇāvāśāḥ śiro dyaurmukhamapi dahano yasya
vāsteyamabdhiḥ |

अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः

antaḥsthaṃ yasya viśvaṃ
suranarakhagagobhogigandharvadaityaiḥ

चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि॥ २॥

citraṃ raṃramyate taṃ tribhuvanavapuṣaṃ viṣṇumīśaṃ namāmi |2|

ॐ नमो भगवते वासुदेवाय ॥

oṃ namo bhagavate vāsudevāya ||

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं

śāntākāraṃ bhujagaśayanaṃ padmanābhaṃ sureśaṃ

विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।

viśvādhāraṃ gaganasadṛśaṃ meghavarṇaṃ śubhāṅgam |

लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं

lakṣmīkāntaṃ kamalanayanaṃ yogibhirdhyānagamyaṃ

वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥ ३॥

vande viṣṇuṃ bhavabhayaharaṃ sarvalokaikanātham |3|

मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम्।

meghaśyāmaṃ pītakauśeyavāsaṃ
śrīvatsāṅkaṃ kaustubhodbhāsitāṅgam |

पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम्॥ ४॥

puṇyopetaṃ puṇḍarīkāyatākṣaṃ
viṣṇuṃ vande sarvalokaikanātham |4|

नमः समस्तभूतानामादिभूताय भूभृते।

namaḥ samastabhūtānāmādibhūtāya bhūbhṛte |

अनेकरूपरूपाय विष्णवे प्रभविष्णवे॥ ५॥

anekarūparūpāya viṣṇave prabhaviṣṇave |5|

सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम्।

saśaṅkhacakraṃ sakirīṭakuṇḍalaṃ sapītavastraṃ sarasīruhekṣaṇam |

सहारवक्षःस्थलशोभिकौस्तुभं नमामि विष्णुं शिरसा चतुर्भुजम्॥ ६॥

sahāravakṣaḥsthalaśobhikaustubhaṃ namāmi viṣṇuṃ śirasā caturbhujam |6|

छायायां पारिजातस्य हेमसिंहासनोपरि

chāyāyāṃ pārijātasya hemasiṃhāsanopari

आसीनमम्बुदश्याममायताक्षमलङ्कृतम्।

āsīnamambudaśyāmamāyatākṣamalaṅkṛtam |

चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कितवक्षसं

candrānanaṃ caturbāhuṃ śrīvatsāṅkitavakṣasaṃ

रुक्मिणी सत्यभामाभ्यां सहितं कृष्णमाश्रये॥ ७॥

rukmiṇī satyabhāmābhyāṃ sahitaṃ kṛṣṇamāśraye |7|

## ॥ स्तोत्रम् ॥

|| stotram ||

## ॥ ॐ विश्वस्मै नमः ॥

|| om viśvasmai namaḥ ||

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः।

viśvaṃ viṣṇurvaṣaṭkāro bhūtabhavyabhavatprabhuḥ |

भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः॥ १॥

bhūtakṛdbhūtabhṛdbhāvo bhūtātmā bhūtabhāvanaḥ |1|

पूतात्मा परमात्मा च मुक्तानां परमा गतिः।

pūtātmā paramātmā ca muktānāṃ paramā gatiḥ |

अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च॥ २॥

avyayaḥ puruṣaḥ sākṣī kṣetrajño'kṣara eva ca |2|

योगो योगविदां नेता प्रधानपुरुषेश्वरः।

yogo yogavidāṃ netā pradhānapuruṣeśvaraḥ |

नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः॥ ३॥

nārasiṃhavapuḥ śrīmān keśavaḥ puruṣottamaḥ |3|

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः।

sarvaḥ śarvaḥ śivaḥ sthāṇurbhūtādirnidhiravyayaḥ |

सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४॥

sambhavo bhāvano bhartā prabhavaḥ prabhurīśvaraḥ |4|

स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः।

svayambhūḥ śambhurādityaḥ puṣkarākṣo mahāsvanaḥ |

अनादिनिधनो धाता विधाता धातुरुत्तमः॥ ५॥

anādinidhano dhātā vidhātā dhāturuttamaḥ |5|

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः।

aprameyo hṛṣīkeśaḥ padmanābho'maraprabhuḥ |

विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः॥ ६॥

viśvakarmā manustvaṣṭā sthaviṣṭhaḥ sthaviro dhruvaḥ |6|

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः।

agrāhyaḥ śāśvataḥ kṛṣṇo lohitākṣaḥ pratardanaḥ |

प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम्॥ ७॥

prabhūtastrikakubdhāma pavitraṃ maṅgalaṃ param |7|

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः।

īśānaḥ prāṇadaḥ prāṇo jyeṣṭhaḥ śreṣṭhaḥ prajāpatiḥ |

हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥ ८॥

hiraṇyagarbho bhūgarbho mādhavo madhusūdanaḥ |8|

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः।

īśvaro vikramī dhanvī medhāvī vikramaḥ kramaḥ |

अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्॥ ९॥

anuttamo durādharṣaḥ kṛtajñaḥ kṛtirātmavān |9|

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः।

sureśaḥ śaraṇaṃ śarma viśvaretāḥ prajābhavaḥ |

अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः॥ १०॥

ahaḥ saṃvatsaro vyālaḥ pratyayaḥ sarvadarśanaḥ |10|

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः।

ajaḥ sarveśvaraḥ siddhaḥ siddhiḥ sarvādiracyutaḥ |

वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः॥ ११॥

vṛṣākapirameyātmā sarvayogaviniḥsṛtaḥ |11|

वसुर्वसुमनाः सत्यः समात्माऽसम्मितः समः।

vasurvasumanāḥ satyaḥ samātmā'sammitaḥ samaḥ |

अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः॥ १२॥

amoghaḥ puṇḍarīkākṣo vṛṣakarmā vṛṣākṛtiḥ |12|

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः।

rudro bahuśirā babhrurviśvayoniḥ śuciśravāḥ |

अमृतः शाश्वतस्थाणुर्वरारोहो महातपाः॥ १३॥

amṛtaḥ śāśvatasthāṇurvarāroho mahātapāḥ |13|

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः।

sarvagaḥ sarvavidbhānurviṣvakseno janārdanaḥ |

वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥ १४॥

vedo vedavidavyaṅgo vedāṅgo vedavit kaviḥ |14|

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः।

lokādhyakṣaḥ surādhyakṣo dharmādhyakṣaḥ kṛtākṛtaḥ |

चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः॥ १५॥

caturātmā caturvyūhaścaturdaṃṣṭraścaturbhujaḥ |15|

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः।

bhrājiṣṇurbhojanaṃ bhoktā sahiṣṇurjagadādijaḥ |

अनघो विजयो जेता विश्वयोनिः पुनर्वसुः॥ १६॥

anagho vijayo jetā viśvayoniḥ punarvasuḥ |16|

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः।

upendro vāmanaḥ prāṃśuramoghaḥ śucirūrjitaḥ |

अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः॥ १७॥

atīndraḥ saṃgrahaḥ sargo dhṛtātmā niyamo yamaḥ |17|

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः।

vedyo vaidyaḥ sadāyogī vīrahā mādhavo madhuḥ |

अतीन्द्रियो महामायो महोत्साहो महाबलः॥ १८॥

atīndriyo mahāmāyo mahotsāho mahābalaḥ |18|

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः।

mahābuddhirmahāvīryo mahāśaktirmahādyutiḥ |

अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक्॥ १९॥

anirdeśyavapuḥ śrīmānameyātmā mahādridhṛk |19|

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः।

maheṣvāso mahībhartā śrīnivāsaḥ satāṃ gatiḥ |

अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः॥ २०॥

aniruddhaḥ surānando govindo govidāṃ patiḥ |20|

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः।

marīcirdamano haṃsaḥ suparṇo bhujagottamaḥ |

हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः॥ २१॥

hiraṇyanābhaḥ sutapāḥ padmanābhaḥ prajāpatiḥ |21|

अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः।

amṛtyuḥ sarvadṛk siṃhaḥ sandhātā sandhimān sthiraḥ |

अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा॥ २२॥

ajo durmarṣaṇaḥ śāstā viśrutātmā surārihā |22|

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः।

gururgurutamo dhāma satyaḥ satyaparākramaḥ |

निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः॥ २३॥

nimiṣo'nimiṣaḥ sragvī vācaspatirudāradhīḥ |23|

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः।

agraṇīrgrāmaṇīḥ śrīmān nyāyo netā samīraṇaḥ |

सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥ २४॥

sahasramūrdhā viśvātmā sahasrākṣaḥ sahasrapāt |24|

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः।

āvartano nivṛttātmā saṃvṛtaḥ saṃpramardanaḥ |

अहः संवर्तको वह्निरनिलो धरणीधरः॥ २५॥

ahaḥ saṃvartako vahniranilo dharaṇīdharaḥ |25|

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः।

suprasādaḥ prasannātmā viśvadhṛgviśvabhugvibhuḥ |

सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः॥ २६॥

satkartā satkṛtaḥ sādhurjahnurnārāyaṇo naraḥ |26|

असङ्ख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः।

Asaṅkhyeyo'prameyātmā viśiṣṭaḥ śiṣṭakṛcchuciḥ |

सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः॥ २७॥

siddhārthaḥ siddhasaṅkalpaḥ siddhidaḥ siddhisādhanaḥ |27|

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः।

vṛṣāhī vṛṣabho viṣṇurvṛṣaparvā vṛṣodaraḥ |

वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः॥ २८॥

vardhano vardhamānaśca viviktaḥ śrutisāgaraḥ |28|

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः।

subhujo durdharo vāgmī mahendro vasudo vasuḥ |

नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९ ॥

naikarūpo bṛhadrūpaḥ śipiviṣṭaḥ prakāśanaḥ |29|

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।

ojastejodyutidharaḥ prakāśātmā pratāpanaḥ |

ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ३० ॥

ṛddhaḥ spaṣṭākṣaro mantraścandrāṃśurbhāskaradyutiḥ |30|

अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।

amṛtāṃśūdbhavo bhānuḥ śaśabinduḥ sureśvaraḥ |

औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ३१ ॥

auṣadhaṃ jagataḥ setuḥ satyadharmaparākramaḥ |31|

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।

bhūtabhavyabhavannāthaḥ pavanaḥ pāvano'nalaḥ |

कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥ ३२ ॥

kāmahā kāmakṛtkāntaḥ kāmaḥ kāmapradaḥ prabhuḥ |32|

युगादिकृद्युगावर्तो नैकमायो महाशनः ।

yugādikṛdyugāvarto naikamāyo mahāśanaḥ |

अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित्॥ ३३ ॥

adṛśyo vyaktarūpaśca sahasrajidanantajit |33|

इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।

iṣṭo'viśiṣṭaḥ śiṣṭeṣṭaḥ śikhaṇḍī nahuṣo vṛṣaḥ |

क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः॥ ३४॥

krodhahā krodhakṛtkartā viśvabāhurmahīdharaḥ |34|

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः।

acyutaḥ prathitaḥ prāṇaḥ prāṇado vāsavānujaḥ |

अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः॥ ३५॥

apāṃ nidhiradhiṣṭhānamapramattaḥ pratiṣṭhitaḥ |35|

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः।

skandaḥ skandadharo dhuryo varado vāyuvāhanaḥ |

वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः॥ ३६॥

vāsudevo bṛhadbhānurādidevaḥ purandaraḥ |36|

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः।

aśokastāraṇastāraḥ śūraḥ śaurirjaneśvaraḥ |

अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः॥ ३७॥

anukūlaḥ śatāvartaḥ padmī padmanibhekṣaṇaḥ |37|

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्।

padmanābho'ravindākṣaḥ padmagarbhaḥ śarīrabhṛt |

महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः॥ ३८॥

maharddhirṛddho vṛddhātmā mahākṣo garuḍadhvajaḥ |38|

अतुलः शरभो भीमः समयज्ञो हविर्हरिः।

atulaḥ śarabho bhīmaḥ samayajño havirhariḥ |

सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥ ३९ ॥

sarvalakṣaṇalakṣaṇyo lakṣmīvān samitiñjayaḥ |39|

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।

vikṣaro rohito mārgo heturdāmodaraḥ sahaḥ |

महीधरो महाभागो वेगवानमिताशनः ॥ ४० ॥

mahīdharo mahābhāgo vegavānamitāśanaḥ |40|

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।

udbhavaḥ kṣobhaṇo devaḥ śrīgarbhaḥ parameśvaraḥ |

करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ४१ ॥

karaṇaṃ kāraṇaṃ kartā vikartā gahano guhaḥ |41|

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।

vyavasāyo vyavasthānaḥ saṃsthānaḥ sthānado dhruvaḥ |

परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ४२ ॥

pararddhiḥ paramaspaṣṭastuṣṭaḥ puṣṭaḥ śubhekṣaṇaḥ |42|

रामो विरामो विरतो मार्गो नेयो नयोऽनयः ।

rāmo virāmo virato mārgo neyo nayo'nayaḥ |

वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ४३ ॥

vīraḥ śaktimatāṃ śreṣṭho dharmo dharmaviduttamaḥ |43|

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।

vaikuṇṭhaḥ puruṣaḥ prāṇaḥ prāṇadaḥ praṇavaḥ pṛthuḥ |

हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः॥ ४४॥

hiraṇyagarbhaḥ śatrughno vyāpto vāyuradhokṣajaḥ |44|

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः।

ṛtuḥ sudarśanaḥ kālaḥ parameṣṭhī parigrahaḥ |

उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः॥ ४५॥

ugraḥ saṃvatsaro dakṣo viśrāmo viśvadakṣiṇaḥ |45|

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम्।

vistāraḥ sthāvarasthāṇuḥ pramāṇaṃ bījamavyayam |

अर्थोऽनर्थो महाकोशो महाभोगो महाधनः॥ ४६॥

artho'nartho mahākośo mahābhogo mahādhanaḥ |46|

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः।

anirviṇṇaḥ sthaviṣṭho'bhūrdharmayūpo mahāmakhaḥ |

नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः॥ ४७॥

nakṣatranemirnakṣatrī kṣamaḥ kṣāmaḥ samīhanaḥ |47|

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः।

yajña ijyo mahejyaśca kratuḥ satraṃ satāṃ gatiḥ |

सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम्॥ ४८॥

sarvadarśī vimuktātmā sarvajño jñānamuttamam |48|

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्।

suvrataḥ sumukhaḥ sūkṣmaḥ sughoṣaḥ sukhadaḥ suhṛt |

मनोहरो जितक्रोधो वीरबाहुर्विदारणः॥ ४९॥

manoharo jitakrodho vīrabāhurvidāraṇaḥ |49|

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्।

svāpanaḥ svavaśo vyāpī naikātmā naikakarmakṛt |

वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः॥ ५०॥

vatsaro vatsalo vatsī ratnagarbho dhaneśvaraḥ |50|

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम्।

dharmagubdharmakṛddharmī sadasatkṣaramakṣaram |

अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः॥ ५१॥

avijñātā sahasrāṃśurvidhātā kṛtalakṣaṇaḥ |51|

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः।

gabhastinemiḥ sattvasthaḥ siṃho bhūtamaheśvaraḥ |

आदिदेवो महादेवो देवेशो देवभृद्गुरुः॥ ५२॥

ādidevo mahādevo deveśo devabhṛdguruḥ |52|

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः।

uttaro gopatirgoptā jñānagamyaḥ purātanaḥ |

शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः॥ ५३॥

śarīrabhūtabhṛdbhoktā kapīndro bhūridakṣiṇaḥ |53|

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः।

somapo'mṛtapaḥ somaḥ purujitpurusattamaḥ |

विनयो जयः सत्यसन्धो दाशार्हः सात्त्वतां पतिः ॥ ५४॥

vinayo jayaḥ satyasandho dāśārhaḥ sāttvatāṃ patiḥ |54|

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः।

jīvo vinayitā sākṣī mukundo'mitavikramaḥ |

अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः॥ ५५॥

ambhonidhiranantātmā mahodadhiśayo'ntakaḥ |55|

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः।

ajo mahārhaḥ svābhāvyo jitāmitraḥ pramodanaḥ |

आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः॥ ५६ ॥

ānando nandano nandaḥ satyadharmā trivikramaḥ |56|

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः।

maharṣiḥ kapilācāryaḥ kṛtajño medinīpatiḥ |

त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत्॥ ५७॥

tripadastridaśādhyakṣo mahāśṛṅgaḥ kṛtāntakṛt |57|

महावराहो गोविन्दः सुषेणः कनकाङ्गदी।

mahāvarāho govindaḥ suṣeṇaḥ kanakāṅgadī |

गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः॥ ५८॥

guhyo gabhīro gahano guptaścakragadādharaḥ |58|

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः।

vedhāḥ svāṅgo'jitaḥ kṛṣṇo dṛḍhaḥ saṅkarṣaṇo'cyutaḥ |

वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ५९ ॥

varuṇo vāruṇo vṛkṣaḥ puṣkarākṣo mahāmanāḥ |59|

भगवान् भगहाऽऽनन्दी वनमाली हलायुधः ।

bhagavān bhagahā''nandī vanamālī halāyudhaḥ |

आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ६० ॥

ādityo jyotirādityaḥ sahiṣṇurgatisattamaḥ |60|

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।

sudhanvā khaṇḍaparaśurdāruṇo draviṇapradaḥ |

दिवःस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१ ॥

divaḥspṛk sarvadṛgvyāso vācaspatirayonijaḥ |61|

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।

trisāmā sāmagaḥ sāma nirvāṇaṃ bheṣajaṃ bhiṣak |

सन्न्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ॥ ६२ ॥

sannyāsakṛcchamaḥ śānto niṣṭhā śāntiḥ parāyaṇam |62|

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।

śubhāṅgaḥ śāntidaḥ sraṣṭā kumudaḥ kuvaleśayaḥ |

गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३ ॥

gohito gopatirgoptā vṛṣabhākṣo vṛṣapriyaḥ |63|

अनिवर्ती निवृत्तात्मा सङ्क्षेप्ता क्षेमकृच्छिवः ।

anivartī nivṛttātmā saṅkṣeptā kṣemakṛcchivaḥ |

श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥ ६४॥

śrīvatsavakṣāḥ śrīvāsaḥ śrīpatiḥ śrīmatāṃ varaḥ |64|

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः।

śrīdaḥ śrīśaḥ śrīnivāsaḥ śrīnidhiḥ śrīvibhāvanaḥ |

श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः॥ ६५॥

śrīdharaḥ śrīkaraḥ śreyaḥ śrīmānlokatrayāśrayaḥ |65|

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः।

svakṣaḥ svaṅgaḥ śatānando nandirjyotirgaṇeśvaraḥ |

विजितात्माऽविधेयात्मा सत्कीर्तिश्छिन्नसंशयः॥ ६६॥

vijitātmā'vidheyātmā satkīrtiśchinnasaṃśayaḥ |66|

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः।

udīrṇaḥ sarvataścakṣuranīśaḥ śāśvatasthiraḥ |

भूशयो भूषणो भूतिर्विशोकः शोकनाशनः॥ ६७॥

bhūśayo bhūṣaṇo bhūtirviśokaḥ śokanāśanaḥ |67|

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः।

arciṣmānarcitaḥ kumbho viśuddhātmā viśodhanaḥ |

अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः॥ ६८॥

aniruddho'pratirathaḥ pradyumno'mitavikramaḥ |68|

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः।

kālaneminihā vīraḥ śauriḥ śūrajaneśvaraḥ |

त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः॥ ६९॥

trilokātmā trilokeśaḥ keśavaḥ keśihā hariḥ |69|

कामदेवः कामपालः कामी कान्तः कृतागमः।

kāmadevaḥ kāmapālaḥ kāmī kāntaḥ kṛtāgamaḥ |

अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः॥ ७०॥

anirdeśyavapurviṣṇurvīro'nanto dhanañjayaḥ |70|

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः।

brahmaṇyo brahmakṛd brahmā brahma brahmavivardhanaḥ |

ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः॥ ७१॥

brahmavid brāhmaṇo brahmī brahmajño brāhmaṇapriyaḥ|71|

महाक्रमो महाकर्मा महातेजा महोरगः।

mahākramo mahākarmā mahātejā mahoragaḥ |

महाक्रतुर्महायज्वा महायज्ञो महाहविः॥ ७२॥

mahākraturmahāyajvā mahāyajño mahāhaviḥ |72|

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः।

stavyaḥ stavapriyaḥ stotraṃ stutiḥ stotā raṇapriyaḥ |

पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः॥ ७३॥

pūrṇaḥ pūrayitā puṇyaḥ puṇyakīrtiranāmayaḥ |73|

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः।

manojavastīrthakaro vasuretā vasupradaḥ |

वसुप्रदो वासुदेवो वसुर्वसुमना हविः॥ ७४॥

vasuprado vāsudevo vasurvasumanā haviḥ |74|

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः।

sadgatiḥ satkṛtiḥ sattā sadbhūtiḥ satparāyaṇaḥ |

शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः॥ ७५॥

śūraseno yaduśreṣṭhaḥ sannivāsaḥ suyāmunaḥ |75|

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः।

bhūtāvāso vāsudevaḥ sarvāsunilayo'nalaḥ |

दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः॥ ७६॥

darpahā darpado dṛpto durdharo'thāparājitaḥ |76|

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान्।

viśvamūrtirmahāmūrtirdīptamūrtiramūrtimān |

अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः॥ ७७॥

anekamūrtiravyaktaḥ śatamūrtiḥ śatānanaḥ |77|

एको नैकः सवः कः किं यत् तत्पदमनुत्तमम्।

eko naikaḥ savaḥ kaḥ kiṃ yat tatpadamanuttamam |

लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः॥ ७८॥

lokabandhurlokanātho mādhavo bhaktavatsalaḥ |78|

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।

suvarṇavarṇo hemāṅgo varāṅgaścandanāṅgadī |

वीरहा विषमः शून्यो घृताशीरचलश्चलः॥ ७९॥

vīrahā viṣamaḥ śūnyo ghṛtāśīracalaścalaḥ |79|

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक्।

amānī mānado mānyo lokasvāmī trilokadhṛk |

सुमेधा मेधजो धन्यः सत्यमेधा धराधरः॥ ८०॥

sumedhā medhajo dhanyaḥ satyamedhā dharādharaḥ |80|

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः।

tejovṛṣo dyutidharaḥ sarvaśastrabhṛtāṃ varaḥ |

प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः॥ ८१॥

pragraho nigraho vyagro naikaśṛṅgo gadāgrajaḥ |81|

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः।

caturmūrtiścaturbāhuścaturvyūhaścaturgatiḥ |

चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्॥ ८२॥

caturātmā caturbhāvaścaturvedavidekapāt |82|

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः।

samāvarto'nivṛttātmā durjayo duratikramaḥ |

दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥ ८३॥

durlabho durgamo durgo durāvāso durārihā |83|

शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः।

śubhāṅgo lokasāraṅgaḥ sutantustantuvardhanaḥ |

इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः॥ ८४॥

indrakarmā mahākarmā kṛtakarmā kṛtāgamaḥ |84|

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः।

udbhavaḥ sundaraḥ sundo ratnanābhaḥ sulocanaḥ |

अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी॥ ८५॥

arko vājasanaḥ śṛṅgī jayantaḥ sarvavijjayī |85|

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः।

suvarṇabindurakṣobhyaḥ sarvavāgīśvareśvaraḥ |

महाह्रदो महागर्तो महाभूतो महानिधिः॥ ८६॥

mahāhrado mahāgarto mahābhūto mahānidhiḥ |86|

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः।

kumudaḥ kundaraḥ kundaḥ parjanyaḥ pāvano'nilaḥ |

अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः॥ ८७॥

amṛtāśo'mṛtavapuḥ sarvajñaḥ sarvatomukhaḥ |87|

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः।

sulabhaḥ suvrataḥ siddhaḥ śatrujicchatrutāpanaḥ |

न्यग्रोधोऽदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः॥ ८८॥

nyagrodho'dumbaro'śvatthaścāṇūrāndhraniṣūdanaḥ |88|

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः।

sahasrārciḥ saptajihvaḥ saptaidhāḥ saptavāhanaḥ |

अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः॥ ८९॥

amūrtiranagho'cintyo bhayakṛdbhayanāśanaḥ |89|

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान्।

aṇurbṛhatkṛśaḥ sthūlo guṇabhṛnnirguṇo mahān |

अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः॥ ९०॥

adhṛtaḥ svadhṛtaḥ svāsyaḥ prāgvaṃśo vaṃśavardhanaḥ |90|

भारभृत् कथितो योगी योगीशः सर्वकामदः।

bhārabhṛt kathito yogī yogīśaḥ sarvakāmadaḥ |

आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः॥ ९१॥

āśramaḥ śramaṇaḥ kṣāmaḥ suparṇo vāyuvāhanaḥ |91|

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः।

dhanurdharo dhanurvedo daṇḍo damayitā damaḥ |

अपराजितः सर्वसहो नियन्ताऽनियमोऽयमः॥ ९२॥

aparājitaḥ sarvasaho niyantā'niyamo'yamaḥ |92|

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः।

sattvavān sāttvikaḥ satyaḥ satyadharmaparāyaṇaḥ |

अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः॥ ९३॥

abhiprāyaḥ priyārho'rhaḥ priyakṛt prītivardhanaḥ |93|

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः।

vihāyasagatirjyotiḥ surucirhutabhugvibhuḥ |

रविर्विरोचनः सूर्यः सविता रविलोचनः॥ ९४॥

ravirvirocanaḥ sūryaḥ savitā ravilocanaḥ |94|

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः।

ananto hutabhugbhoktā sukhado naikajo'grajaḥ |

अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः॥ ९५॥

anirviṇṇaḥ sadāmarṣī lokādhiṣṭhānamadbhutaḥ |95|

सनात्सनातनतमः कपिलः कपिरप्ययः।

sanātsanātanatamaḥ kapilaḥ kapirapyayaḥ |

स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः॥ ९६॥

svastidaḥ svastikṛtsvasti svastibhuksvastidakṣiṇaḥ |96|

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः।

araudraḥ kuṇḍalī cakrī vikramyūrjitaśāsanaḥ |

शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः॥ ९७॥

śabdātigaḥ śabdasahaḥ śiśiraḥ śarvarīkaraḥ |97|

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः।

akrūraḥ peśalo dakṣo dakṣiṇaḥ kṣamiṇāṃ varaḥ |

विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः॥ ९८॥

vidvattamo vītabhayaḥ puṇyaśravaṇakīrtanaḥ |98|

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः।

uttāraṇo duṣkṛtihā puṇyo duḥsvapnanāśanaḥ |

वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः॥ ९९॥

vīrahā rakṣaṇaḥ santo jīvanaḥ paryavasthitaḥ |99|

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः।

anantarūpo'nantaśrīrjitamanyurbhayāpahaḥ |

चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः॥ १००॥

caturaśro gabhīrātmā vidiśo vyādiśo diśaḥ |100|

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः।

anādirbhūrbhuvo lakṣmīḥ suvīro rucirāṅgadaḥ |

जननो जनजन्मादिर्भीमो भीमपराक्रमः॥ १०१॥

janano janajanmādirbhīmo bhīmaparākramaḥ |101|

आधारनिलयोऽधाता पुष्पहासः प्रजागरः।

ādhāranilayo'dhātā puṣpahāsaḥ prajāgaraḥ |

ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः॥ १०२॥

ūrdhvagaḥ satpathācāraḥ prāṇadaḥ praṇavaḥ paṇaḥ |102|

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः।

pramāṇaṃ prāṇanilayaḥ prāṇabhṛtprāṇajīvanaḥ |

तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः॥ १०३॥

tattvaṃ tattvavidekātmā janmamṛtyujarātigaḥ |103|

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः।

bhūrbhuvaḥsvastarustāraḥ savitā prapitāmahaḥ |

यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः॥ १०४॥

yajño yajñapatiryajvā yajñāṅgo yajñavāhanaḥ |104|

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः।

yajñabhṛd yajñakṛd yajñī yajñabhug yajñasādhanaḥ |

यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च॥ १०५॥

yajñāntakṛd yajñaguhyamannamannāda eva ca |105|

आत्मयोनिः स्वयंजातो वैखानः सामगायनः।

ātmayoniḥ svayaṃjāto vaikhānaḥ sāmagāyanaḥ |

देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः॥ १०६॥

devakīnandanaḥ sraṣṭā kṣitīśaḥ pāpanāśanaḥ |106|

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः।

śaṅkhabhṛnnandakī cakrī śārṅgadhanvā gadādharaḥ |

रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः॥ १०७॥

rathāṅgapāṇirakṣobhyaḥ sarvapraharaṇāyudhaḥ |107|

सर्वप्रहरणायुध ॐ नम इति।

sarvapraharaṇāyudha om nama iti |

वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी।

vanamālī gadī śārṅgī śaṅkhī cakrī ca nandakī |

श्रीमान् नारायणो विष्णुर्वासुदेवोऽभिरक्षतु॥ १०८॥

rīmān nārāyaṇo viṣṇurvāsudevo'bhirakṣatu |108|

श्री वासुदेवोऽभिरक्षतु ॐ नम इति।

śrī vāsudevo'bhirakṣatu om nama iti |

॥ उत्तरभागः॥

||uttarabhāgaḥ||

इतीदं कीर्तनीयस्य केशवस्य महात्मनः।

itīdaṃ kīrtanīyasya keśavasya mahātmanaḥ |

नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम्॥ १॥

nāmnāṃ sahasraṃ divyānāmaśeṣeṇa prakīrtitam |1|

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत्।

ya idaṃ śṛṇuyānnityaṃ yaścāpi parikīrtayet |

नाशुभं प्राप्नुयात् किञ्चित्सोऽमुत्रेह च मानवः॥ २॥

nāśubhaṃ prāpnuyāt kiñcitso'mutreha ca mānavaḥ |2|

वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत्।

vedāntago brāhmaṇaḥ syātkṣatriyo vijayī bhavet |

वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्॥ ३॥

vaiśyo dhanasamṛddhaḥ syācchūdraḥ sukhamavāpnuyāt |3|

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात्।

dharmārthī prāpnuyāddharmamarthārthī cārthamāpnuyāt |

कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाम्॥ ४॥

kāmānavāpnuyātkāmī prajārthī cāpnuyātprajām |4|

भक्तिमान्यः  सदोत्थाय शुचिस्तद्गतमानसः।

bhaktimān yaḥ sadotthāya śucistadgatamānasaḥ |

सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत्॥ ५॥

sahasraṃ vāsudevasya nāmnāmetatprakīrtayet |5|

यशः प्राप्नोति विपुलं याति प्राधान्यमेव च।

yaśaḥ prāpnoti vipulaṃ yāti prādhānyameva ca |

अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम्॥ ६॥

acalāṃ śriyamāpnoti śreyaḥ prāpnotyanuttamam |6|

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति।

na bhayaṃ kvacidāpnoti vīryaṃ tejaśca vindati |

भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः॥ ७॥

bhavatyarogo dyutimānbalarūpaguṇānvitaḥ |7|

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात्।

rogārto mucyate rogādbaddho mucyeta bandhanāt |

भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः॥ ८॥

bhayānmucyeta bhītastu mucyetāpanna āpadaḥ |8|

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम्।

durgāṇyatitaratyāśu puruṣaḥ puruṣottamam |

स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः॥ ९॥

stuvannāmasahasreṇa nityaṃ bhaktisamanvitaḥ |9|

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः।

vāsudevāśrayo martyo vāsudevaparāyaṇaḥ |

सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम्॥ १०॥

sarvapāpaviśuddhātmā yāti brahma sanātanam |10|

न वासुदेवभक्तानामशुभं विद्यते क्वचित्।

na vāsudevabhaktānāmaśubhaṃ vidyate kvacit |

जन्ममृत्युजराव्याधिभयं नैवोपजायते॥ ११॥

janmamṛtyujarāvyādhibhayaṃ naivopajāyate |11|

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः।

imaṃ stavamadhīyānaḥ śraddhābhaktisamanvitaḥ |

युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः॥ १२॥

yujyetātmasukhakṣāntiśrīdhṛtismṛtikīrtibhiḥ |12|

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।

na krodho na ca mātsaryaṃ na lobho nāśubhā matiḥ |

भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे॥ १३॥

bhavanti kṛtapuṇyānāṃ bhaktānāṃ puruṣottame |13|

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः।

dyauḥ sacandrārkanakṣatrā khaṃ diśo bhūrmahodadhiḥ |

वासुदेवस्य वीर्येण विधृतानि महात्मनः॥ १४॥

vāsudevasya vīryeṇa vidhṛtāni mahātmanaḥ |14|

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम्।

sasurāsuragandharvaṃ sayakṣoragarākṣasam |

जगद्वशे वर्ततेदं कृष्णस्य सचराचरम्॥ १५॥

jagadvaśe vartatedaṃ kṛṣṇasya sacarācaram |15|

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः।

indriyāṇi mano buddhiḥ sattvaṃ tejo balaṃ dhṛtiḥ |

वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च॥ १६॥

vāsudevātmakānyāhuḥ kṣetraṃ kṣetrajña eva ca |16|

सर्वागमानामाचारः प्रथमं परिकल्पते।

sarvāgamānāmācāraḥ prathamaṃ parikalpate |

आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः॥ १७॥

ācāraprabhavo dharmo dharmasya prabhuracyutaḥ |17|

ऋषयः पितरो देवा महाभूतानि धातवः।

ṛṣayaḥ pitaro devā mahābhūtāni dhātavaḥ |

जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम्॥ १८॥

jaṅgamājaṅgamaṃ cedaṃ jagannārāyaṇodbhavam |18|

योगो ज्ञानं तथा साङ्ख्यं विद्याः शिल्पादि कर्म च।

yogo jñānaṃ tathā sāṅkhyaṃ vidyāḥ śilpādi karma ca |

वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्॥ १९॥

vedāḥ śāstrāṇi vijñānametatsarvaṃ janārdanāt |19|

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः।

eko viṣṇurmahadbhūtaṃ pṛthagbhūtānyanekaśaḥ |

त्रीँल्लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः॥ २०॥

trīllokānvyāpya bhūtātmā bhuṅkte viśvabhugavyayaḥ |20|

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम्।

imaṃ stavaṃ bhagavato viṣṇorvyāsena kīrtitam |

पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च॥ २१॥

paṭhedya icchetpuruṣaḥ śreyaḥ prāptuṃ sukhāni ca |21|

विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम्।

viśveśvaramajaṃ devaṃ jagataḥ prabhumavyayam |

भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम्॥ २२॥

bhajanti ye puṣkarākṣaṃ na te yānti parābhavam |22|

न ते यान्ति पराभवम् ॐ नम इति।

na te yānti parābhavam om nama iti |

अर्जुन उवाच ---

arjuna uvāca ---

पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम।

padmapatraviśālākṣa padmanābha surottama |

भक्तानामनुरक्तानां त्राता भव जनार्दन॥ २३॥

bhaktānāmanuraktānāṃ trātā bhava janārdana |23|

श्रीभगवानुवाच ---

śrībhagavānuvāca ---

यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव।

yo māṃ nāmasahasreṇa stotumicchati pāṇḍava |

सोऽहमेकेन श्लोकेन स्तुत एव न संशयः॥ २४॥

so'hamekena ślokena stuta eva na saṃśayaḥ |24|

स्तुत एव न संशय ॐ नम इति।

stuta eva na saṃśaya om nama iti |

व्यास उवाच ---

vyāsa uvāca ---

वासनाद्वासुदेवस्य वासितं भुवनत्रयम्।

vāsanādvāsudevasya vāsitaṃ bhuvanatrayam |

सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते॥ २५॥

sarvabhūtanivāso'si vāsudeva namo'stu te |25|

श्री वासुदेव नमोऽस्तुत ॐ नम इति।

śrī vāsudeva namo'stuta om nama iti |

पार्वत्युवाच ---

pārvatyuvāca ---

केनोपायेन लघुना विष्णोर्नामसहस्त्रकम्।

kenopāyena laghunā viṣṇornāmasahasrakam |

पठ्यते पण्डितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो॥ २६॥

paṭhyate paṇḍitairnityaṃ śrotumicchāmyahaṃ prabho |26|

ईश्वर उवाच ---

īśvara uvāca ---

श्रीराम राम रामेति रमे रामे मनोरमे।

śrīrāma rāma rāmeti rame rāme manorame |

सहस्त्रनाम तत्तुल्यं राम नाम वरानने॥ २७॥

sahasranāma tattulyaṃ rāma nāma varānane |27|

श्रीरामनाम वरानन ॐ नम इति।

śrīrāmanāma varānana om nama iti |

ब्रह्मोवाच ---

brahmovāca ---

नमोऽस्त्वनन्ताय सहस्त्रमूर्तये

namo'stvanantāya sahasramūrtaye

सहस्रपादाक्षिशिरोरुबाहवे।

sahasrapādākṣiśirorubāhave |

सहस्रनाम्ने पुरुषाय शाश्वते

sahasranāmne puruṣāya śāśvate

सहस्रकोटियुगधारिणे नमः॥ २८॥

sahasrakoṭiyugadhāriṇe namaḥ |28|

सहस्रकोटियुगधारिण ॐ नम इति।

sahasrakoṭiyugadhāriṇa om nama iti |

सञ्जय उवाच ---

sañjaya uvāca ---

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।

yatra yogeśvaraḥ kṛṣṇo yatra pārtho dhanurdharaḥ |

तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥ २९॥

tatra śrīrvijayo bhūtirdhruvā nītirmatirmama |29|

श्रीभगवानुवाच ---

śrībhagavānuvāca ---

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।

ananyāścintayanto māṃ ye janāḥ paryupāsate |

तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ ३०॥

teṣāṃ nityābhiyuktānāṃ yogakṣemaṃ vahāmyaham |30|

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

paritrāṇāya sādhūnāṃ vināśāya ca duṣkṛtām |

धर्मसंस्थापनार्थाय संभवामि युगे युगे॥ ३१॥

dharmasaṃsthāpanārthāya saṃbhavāmi yuge yuge |31|

आर्ता विषण्णाः शिथिलाश्च भीता घोरेषु च व्याधिषु वर्तमानाः।

ārtā viṣaṇṇāḥ śithilāśca bhītā ghoreṣu ca vyādhiṣu vartamānāḥ |

सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्तु॥ ३२॥

saṅkīrtya nārāyaṇaśabdamātraṃ vimuktaduḥkhāḥ sukhino bhavantu |32|

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।

kāyena vācā manasendriyairvā buddhyātmanā vā prakṛteḥ svabhāvāt |

करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥ ३३॥

karomi yadyat sakalaṃ parasmai nārāyaṇāyeti samarpayāmi |33|

॥ इति श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं संपूर्णम्॥

|| iti śrīviṣṇordivyasahasranāmastotraṃ saṃpūrṇam ||

यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत्।

yadakṣarapadabhraṣṭaṃ mātrāhīnaṃ tu yadbhavet |

तत्सर्वं क्षम्यतां देव प्रसीद पुरुषोत्तम॥

tatsarvaṃ kṣamyatāṃ deva prasīda puruṣottama |

॥ ॐ तत् सत् ॥

||om tat sat||

सर्वं ब्रह्मार्पणमस्तु ॥

sarvaṃ brahmārpaṇamastu ||

## ॥ आपदुद्धारकस्तोत्रम् ॥

|| āpaduddhārakastotram ||

आपदामपहर्त्तारं दातारं सर्वसम्पदाम् ।

āpadāmapaharttāraṃ dātāraṃ sarvasampadām |

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्॥ १ ॥

lokābhirāmaṃ śrīrāmaṃ bhūyo bhūyo namāmyaham||1||

आर्त्तानामार्त्तिहन्तारं भीतानां भीतिनाशनम् ।

ārttānāmārttihantāraṃ bhītānāṃ bhītināśanam |

द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम्॥ २ ॥

dviṣatāṃ kāladaṇḍaṃ taṃ rāmacandraṃ
namāmyaham||2||

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ।

agrataḥ pṛṣṭhataścaiva pārśvataśva mahābalau |

आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ ॥ ३ ॥

ākarṇapūrṇṇadhanvānau rakṣetāṃ rāmalakṣmaṇau||3||

सन्नद्धःकवची खड्गी चापबाणधरो युवा ।

sannaddhaḥkavacī khaḍgī cāpabāṇadharo yuvā |

गच्छन्ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥ ४ ॥

gacchanmamāgrato nityaṃ rāmaḥ pātu salakṣmaṇaḥ||4||

नमः कोदण्डहस्ताय सन्धीकृतशराय च ।

namaḥ kodaṇḍahastāya sandhīkṛtaśarāya ca |

खण्डिताखिलदैत्याय रामायापन्निवारिणे॥५॥

khaṇḍitākhiladaityāya rāmāyāpannivāriṇe||5||

रामाय रामभद्राय रामचन्द्राय वेधसे ।

rāmāya rāmabhadrāya rāmacandrāya vedhase |

रघुनाथाय नाथाय सीतायाः पतये नमः॥६॥

raghunāthāya nāthāya sītāyāḥ pataye namaḥ||6||

अच्युतानन्त गोविन्द नामोच्चारणभेषजात् ।

acyutānanta govinda nāmoccāraṇabheṣajāt |

नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम्॥७॥

naśyanti sakalā rogāḥ satyaṃ satyaṃ vadāmyaham||7||

अच्युतानन्त गोविन्द विष्णो नारायणामृत ।

acyutānanta govinda viṣṇo nārāyaṇāmṛta |

रोगान्मे नाशयाशेषान् आशु धन्वन्तरे हरे॥८॥

rogānme nāśayāśeṣān āśu dhanvantare hare||8||

अच्युतानन्त गोविन्द विष्णो धन्वन्तरे हरे ।

acyutānanta govinda viṣṇo dhanvantare hare |

वासुदेवाखिलानस्य रोगान् नाशय नाशय॥९॥

vāsudevākhilānasya rogān nāśaya nāśaya||9||

अच्युतानन्त गोविन्द सच्चिदानन्द शाश्वत ।

acyutānanta govinda saccidānanda śāśvata |

मच्चेतो रमतां नित्यं त्वच्चारु चरणाम्बुजे॥ १०॥

macceto ramatāṃ nityaṃ tvaccāru caraṇāmbuje||10||

यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।

yajñeśācyuta govinda mādhavānanta keśava |

कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥ ११॥

kṛṣṇa viṣṇo hṛṣīkeśa vāsudeva namo'stu te ||11||

श्रीकृष्ण विष्णो नृहरे मुरारे प्रद्युम्न सङ्कर्षण वासुदेव ।

śrīkṛṣṇa viṣṇo nṛhare murāre pradyumna saṅkarṣaṇa vāsudeva |

अजानिरुद्धामल विश्वरूप त्वं पाहि नः सर्वभयादजस्रम् ॥ १२॥

ajāniruddhāmala viśvarūpa tvaṃ pāhi naḥ sarvabhayādajasram ||12||

हरे राम हरे राम राम राम हरे हरे ।

hare rāma hare rāma rāma rāma hare hare |

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥ १३॥

hare kṛṣṇa hare kṛṣṇa kṛṣṇa kṛṣṇa hare hare||13||

जले विष्णुः स्थले विष्णुर्विष्णुराकाशमुच्यते ।

jale viṣṇuḥ sthale viṣṇurviṣṇurākāśamucyate |

स्थावरं जङ्गमं विष्णुः सर्वं विष्णुमयं जगत्॥ १४॥

sthāvaraṃ jaṅgamaṃ viṣṇuḥ sarvaṃ viṣṇumayaṃ jagat||14||

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।

sarvadharmān parityajya māmekaṃ śaraṇaṃ vraja |

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ १५॥

ahaṃ tvā sarvapāpebhyo mokṣayiṣyāmi mā śucaḥ||15||

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।

satyaṃ satyaṃ punaḥ satyamuddhṛtya bhujamucyate |

वेदाच्छास्त्रं परं नास्ति न दैवं केशवात् परम्॥ १६॥

vedācchāstraṃ paraṃ nāsti na daivaṃ keśavāt param||16||

शरीरे जर्झरीभूते व्याधिग्रस्ते कलेबरे ।

śarīre jarjharībhūte vyādhigraste kalebare |

औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः॥ १७॥

auṣadhaṃ jāhnavītoyaṃ vaidyo nārāyaṇo hariḥ||17||

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।

āloḍya sarvaśāstrāṇi vicārya ca punaḥ punaḥ |

इदमेकं सुनिष्पन्नं ध्येयो नारायणो हरिः ॥ १८॥

idamekaṃ suniṣpannaṃ dhyeyo nārāyaṇo hariḥ ||18||

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।

kāyena vācā manasendriyairvā buddhyātmanā vā prakṛteḥ svabhāvāt |

करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥ १९॥

karomi yadyat sakalaṃ parasmai nārāyaṇāyeti samarpayāmi ||19||

यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ।

yadakṣarapadabhraṣṭaṃ mātrāhīnaṃ tu yadbhavet |

तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते॥ २०॥

tatsarvaṃ kṣamyatāṃ deva nārāyaṇa namo'stu te||20||

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च ।

visargabindumātrāṇi padapādākṣarāṇi ca |

न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम॥ २१॥

nyūnāni cātiriktāni kṣamasva puruṣottama||21||

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।

anyathā śaraṇaṃ nāsti tvameva śaraṇaṃ mama |

तस्मात् कारुण्यभावेन रक्ष रक्ष महाप्रभो॥ २२॥

tasmāt kāruṇyabhāvena rakṣa rakṣa mahāprabho||22||

ॐ तत्सत् सर्वं ब्रह्मार्पणमस्तु ॥

om tatsat sarvaṃ brahmārpaṇamastu ||

॥ हरिः ॐ ॥

|| hariḥ om ||

Edited by Medhā Michika

Visit website **www.arshaavinash.in**

To download the following

**Books On Pujya Swamiji**

Biography of Swami Dayananda Saraswati in English, Hindi and Tamil

**Books in English On Vedanta**

Books on Indian culture, Yoga, Gita, Upanisads, Brahma Sutra and Vedanta Texts

**Books on Sanskrit Grammar**

Books on Dhatukosah, Astadhyayi and Sanskrit Grammar for Vedanta Students

**Books on Indian Culture**

Books in English on Yoga and Indian Culture

**Books on Holy Chant**

Books in English and Sanskrit on Holy Chant

**Articles**

Articles in English on Indian culture & Vedanta Texts

Website of:

Arsha Avinash Foundation
104 Third Street, Tatabad, Coimbatore 641012, INDIA
Phone: + 91 9487373635
E mail: arshaavinash@gmail.com

www.arshaavinash.in